International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(5): 162-165
© 2025 IJMH
www.themultijournal.com

Received: 13-10-2025
Accepted: 27-10-2025
Publish : 28-10-2025

**Dr.K. Leenachandra**
Assistant Professor,
Department of Sahitya,
National Sanskrit University,
Tirupati

**Correspondence:**
**Dr.K. Leenachandra**
Assistant Professor,
Department of Sahitya,
National Sanskrit University,
Tirupati

# संस्कृतसाहित्ये षट्सम्प्रदायाः

**Dr.K. Leenachandra**

**सारांशः**
अयं शोधलेखः संस्कृतकाव्यशास्त्रे प्रसिद्धानां षट्सम्प्रदायानां - अलङ्कारः, रसः, ध्वनिः, रीतिः, वक्रोक्तिः, औचित्यम् - इत्येषां तात्त्विकं, ऐतिहासिकं, समीक्षात्मकं च अध्ययनं करोति । एतेषां सम्प्रदायानां भिन्नदृष्टयः काव्यस्य आत्मा कः ? इति मूलप्रश्नस्य उत्तररूपेण विकसिताः।

**प्रस्तावना**
संस्कृतकाव्यशास्त्रं बहुविधदर्शनोपेतं, सूक्ष्मतत्त्वनिरूपकं च अस्ति। "सम्प्रदायः " इति शब्दः अत्र विशिष्टसाहित्यदृष्टीनां परम्परां बोधयति। एते सम्प्रदायाः न केवलं काव्यस्य स्वरूपं निरूपयन्ति, अपि तु काव्यबोधस्य भिन्नभिन्नान् आयामान् उद्घाटयन्ति।

आचार्याणां मतभेदेन काव्यस्य आत्मा कः इति विषये भिन्नाः सिद्धान्ताः अभवन् - कश्चित् अलङ्कारम्, कश्चित् रसम्, कश्चित् ध्वनिम्, इत्यादि । एतेषां समाहारः एव "षट्सम्प्रदायाः" इति प्रसिद्धः। ते च सम्प्रदायाः क्रमशः इमे भवन्ति –

| क्र.सं | सम्प्रदायः | प्रवर्तकः | ग्रन्थः |
|---|---|---|---|
| १. | रससम्प्रदायः | भरतमुनिः | नाट्यशास्त्रम् |
| २. | अलङ्कारसम्प्रदायः | भामहः | काव्यालङ्कारः |
| ३. | रीतिसम्प्रदायः | वामनः | काव्यालङ्कारसूत्रवृत्तिः |
| ४. | वक्रोक्तिसम्प्रदायः | कुन्तकः | वक्रोक्तिजीवितम् |
| ५. | औचित्यसम्प्रदायः | क्षेमेन्द्रः | औचित्यविचारचर्चा |
| ६. | ध्वनिसम्प्रदायः | आनन्दवर्धनः | ध्वन्यालोकः |

**१. रससम्प्रदायः**
काव्यशास्त्रस्य इतिहासे रससिद्धान्तस्य प्राधान्यता द्रष्टुं शक्यते । भरतमुनिना नाट्यशास्त्रे प्रतिपादिताः रसाः—शृङ्गारः, वीरः, करुणः, रौद्रः, हास्यः, भयानकः, बीभत्सः, अद्भुतः, शान्तः—काव्यस्य आत्मा इति स्वीक्रियन्ते । रससिद्धान्तः भरतमुनेः *नाट्यशास्त्रे* मूलतः प्रतिपादितः। नाट्यशास्त्रस्य षष्ठे अध्याये रससूत्ररूपेण विवेचनं कृतम् । यथा **-विभावानुभाव-व्यभिचारिसंयोगाद् रसनिष्पत्तिः।**[1] एषः सूत्ररूपेण सम्पूर्णरसतत्त्वं निरूपयति। विभावानुभाव-व्यभिचारिभावानां संयोगाद् रसनिष्पत्तिः जायते ।

अभिनवगुप्तेन अस्य विस्तृतव्याख्या कृता, सः वदति - **रसानुभवः अलौकिकानन्दस्वरूपः।**[2] सामाजिकानां हृदयेषु रत्यादिस्थायिभावाः सूक्ष्मवासनारूपेण विद्यन्ते । लौकिकजीवने यैः लौकिकैः ललनोद्यानकटाक्षादिभिः साधनैः इयं वासना तत्प्रमाणं विकसिता भवति । लोके रत्यादि भावानां कारणानि कार्याणि सहकारीणि च काव्येषु अलौकिक विभावानुभावव्यभिचारि भावपदवाच्यानि भवन्ति ।

रसस्तु अलौकिकः । स तु न कार्यो नापि ज्ञाप्यः । रसो न कार्यः। कार्ये सति विभावादि कारणविनाशेऽपि तस्य उपस्थितिप्रसङ्गो भवेत् । यथा गतेऽपि कुम्भकारादि कारणसमूहे कार्यरूपः घटः अवतिष्टते । नाऽपि च रसो ज्ञाप्यः। ज्ञाप्यं हि वस्तु पूर्वसिद्धं भवति । रसस्तु न पूर्वसिद्धः। अथ च रसः कार्योऽपि विद्यते ज्ञाप्यश्चाऽपि ।

कविराजविश्वनाथः साहित्यदर्पणे उक्तवान् - **वाक्यं रसात्मकं काव्यम्।**[३] कविराजविश्वनाथेन स्वीयकाव्यशास्त्रीयग्रन्थे साहित्य-दर्पणे काव्यशास्त्रविषायाः अतिसरलतया प्रस्तुताः । तत्र काव्यलक्षणं प्रतिपादयति नाऽपि च रसो ज्ञाप्यः। ज्ञाप्यं हि वस्तु पूर्वसिद्धं भवति। रसस्तु न पूर्वसिद्धः। अथ च रसः कार्योऽपि विद्यते ज्ञाप्यश्चाऽपि ।

वाक्यं रसात्मकं काव्यम् इति । **वाक्यं स्याद्योग्यताऽकांक्षासत्तियुक्तः पदोच्चयः**[४] इति । योग्यतादिभिः युक्तः पदानां समूहः वाक्यमित्युच्यते। योग्यता नाम पदार्थानां परस्परसम्बन्धे बाधाभावः । यदि पदार्थानां परस्परसम्बन्धे बाधा भवति तर्हि "वह्निना सिञ्चति" इत्यादीनामपि वाक्यरूपता भविष्यति । परन्तु तन्न । आकांक्षा नाम प्रतीतिपर्यवसानविरहः, स च श्रोतुर्जिज्ञासारूपः । निराकांक्षस्य वाक्यत्वे "गौरश्व पुरुषो हस्ती" इत्यादीनामपि वाक्यत्वं भवेत् । आसत्तिर्बुद्ध्यविच्छेदः। बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीति पदेन सह संहतिः स्यात् ।

रसपदेन अत्र ध्वनिकारोक्तवाच्यार्थः न गृह्यते न च वस्त्वलङ्कारयोः प्रतीयमानयोः अर्थयोः ग्रहणं भवति, अपि तु वेद्यान्तर-स्पर्शशून्यब्रह्मास्वादसहोदरात्मकस्य कस्यापि अपरस्य वस्तुनः ग्रहणं भवति। तस्मात् तदेवात्मा साररूपतया जीवनाधायक उपादेयता-प्रयोजको यस्य तद्रसात्मकमिति विश्वनाथस्याभिप्रायः । रसो यत्र न भवति तत्र काव्यत्वमेव न स्यात् । अतः रसः एव काव्यस्य आत्मा इति अस्य सम्प्रदायस्य निष्कर्षः।

## २. अलङ्कारसम्प्रदायः

अलङ्कारसम्प्रदायः प्राचीनतमः। अलङ्कारवादिभिराचार्यैः काव्येषु अलङ्कारतत्वस्य प्राधान्यं सुप्रतिष्ठापितम् । काव्यसौन्दर्यस्य रमणीयतायाश्च सर्वाण्येव तत्वानि तैः अलङ्कारेषु समावेशितानि । येन पदार्थेन तत्वेन वा किञ्चित् वस्तु सुशोभितं क्रियते, तेन तस्य सौन्दर्यवृद्धिश्च भवति सः पदार्थः तत् तत्वं वा अलङ्कारोऽभिधीयते। अत्र उपमा, रूपकं, उत्प्रेक्षा, श्लेषः, अनुप्रासः इत्यादयः अलङ्काराः प्रमुखाः। भामहः, दण्डी इत्यादयः आचार्याः अस्य सम्प्रदायस्य प्रमुखाः प्रतिपादकाः आसन्।

यद्यपि प्रथमं तावद् भरतेनैव नाट्यशास्त्रग्रन्थे काव्येष्वलङ्कारतत्त्वस्य समीक्षा विहिता, अथ च काव्येषु चत्वारोऽलङ्काराः प्रतिपादिताः, तथाऽप्यलङ्कारस्वरूपविवेचने भामह एव प्रथमः। तेन सुस्पष्टमलङ्काराः काव्यस्याऽऽत्मतत्त्वरूपेण प्रतिष्ठापिताः। असौ भरतस्य रसादितत्त्वान्यपि ह्यलङ्कारवर्गे परिगणय्य रसादीन् रसवदाद्यलङ्कारनाम्ना प्रतिपादयामास ।

भामहस्याऽभिमतमस्मिन् विषये वर्तते - अलङ्कारा एव काव्येषु प्राधान्येन सौन्दर्याधायकानि तत्त्वानि सन्ति । यथा कान्तमपि कामिनीमुखं भूषणैर्विना न विभाति, तथैवाऽलङ्कारान् विना काव्यानि न शोभन्ते । **शब्दार्थवक्रतायुतोक्तिरेवाऽलङ्कारः**[५] इति विद्यते भामहकृताऽलङ्कारपरिभाषा । वक्रोक्तिं विनाऽलङ्कारस्याऽभाव एव । अथ च वक्रोक्त्यतिशयोक्ती अभिन्नत्वं भजते। लोकोत्तरत्वादियमतिशयोक्तिरतिरमणीया भवति। अथ चाऽलङ्कारा अनयैव निष्पाद्यन्ते ।

आचार्यो दण्डी काव्यशोभाभाकरान् सर्वानेव धर्मानलङ्कारान् प्राख्यात् । **काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते ।**[६] अस्य सम्प्रदायस्य मतम् -अलङ्काराः एव काव्यस्य प्रमुखसौन्दर्यहेतवः इति ।

## ३. रीतिसम्प्रदायः

रीतिसम्प्रदायः शैलीप्रधानः सम्प्रदायः अस्ति । **रीतिरात्मा काव्यस्ये**ति वचनमुदीर्य वामनः सर्वप्रथमं काव्ये रीतिं महत्तमां प्रतिपादयामास। काव्यशास्त्रजगति रीतितत्त्वस्याऽऽविष्करणं यद्यपि वामनाचार्यादप्यनेकशताब्दिपूर्वकालीनं वर्तते, तथापि वामन एव प्रथम आचार्यो यो रीतिं सविशदं सुस्पष्टञ्च व्याख्याय तां काव्यात्मत्तत्त्वं प्रतिपादितवान् । रीतिस्वरूपं वामनेनैवं निर्दिष्टम् - **विशिष्टा पदसंघटना रीतिः । विशेषो गुणात्मा ।**[७]

पदानां विशिष्टा संघटनैव रीतिः । विशेषपदस्याऽभिप्रायो गुणैः सह सम्बन्धः । काव्यशोभायाः कर्तारो गुणाः काव्यस्य नित्यधर्माः वर्तन्ते। काव्यशोभासम्पादनं विना काव्यरचना न प्रवर्तते । एतां काव्यशोभां विना काव्ये शब्दार्थयोः प्रयोग उपचारमात्रमेव ।

काव्यसमीक्षासंविधाने रीतेर्वा मार्गस्य वा पदस्य प्रयोगः प्राचीनकाले भौगोलिकवैशिष्ट्यानि समुपलक्ष्य बभूव। आचार्यैर्निर्दिष्टम् - विभिन्नप्रदेशेषु निवसन्तो मनीषिणो निजप्रदेशप्रचलितासु प्रसिद्धासु शैलीषु काव्यानि विरचितवन्तः । यथा गौडप्रदेशीयाः लेखकाः समासबहुलायां गौडीशैल्यां, विदर्भदेशवासिनश्च लेखकाः समसरहितायां वैदर्भीशैल्यां काव्यानि रचयामासुः । अत एवैताः शैल्यो मार्गाः वा तत्तत्प्रदेशाभिधानेन प्रसिद्धाः समभवन् । यथा -

१. **वैदर्भी** २. **गौडी** ३. **पाञ्चाली**

अत्र प्रत्येकस्याः रीत्याः स्वकीयं वैशिष्ट्यम् अस्ति - काचित् ओजस्विनी, काचित् माधुर्यपूर्णा, काचित् समता युक्ता । रीतिसम्प्रदायः दर्शयति यत् केवलं अर्थः न, अपितु तस्य प्रस्तुतीकरणस्य पद्धतिः अपि काव्यस्य सौन्दर्यं निर्धारयति ।

परन्तूत्तरवर्तिनि युगे लेखनशैलीनामियं स्थितिः प्रदेशविशेषेभ्यः सम्बन्धविच्छिन्ना भूत्वा कवीनां निजप्रवृत्तिभिः सह सम्बद्धा सञ्जाता।

रीतयः काव्यस्य बहिरङ्गत्तत्त्वानीत्यवबुध्याऽपि काव्यसमीक्षायां तासां महत्त्वं न शक्योऽपोहयितुम् । काव्यस्याऽऽत्मतत्त्वनिरूपणे वामनोऽलङ्कारवादिनामपेक्षातो ध्वनिवादिनां निकटतरं लक्ष्यते। वामनो रीतीनां भव्यं प्रासादं गुणानाश्रित्य चकार । काव्यशोभायाः कर्तारो धर्माः गुणाः रसस्य नियतधर्माः । ते च रसे विद्यमाने तत्र नियतरूपेण वसन्ति । उपस्थितञ्च एते नियतरूपेणोपकुर्वन्ति। गुणान् विना काव्ये काव्यत्वं न भवति । अत आत्मरूपेणाऽनङ्गीकृतानामपि रीतीनां काव्यसमीक्षायां महत्त्वमसन्दिग्धरूपेण भवत्येव ।

**४. वक्रोक्तिसम्प्रदायः**

वक्रोक्तिः काव्यस्याऽऽत्मेति सिद्धान्तस्य प्रतिपादकः आचार्यः कुन्तकः काव्यसमीक्षाजगति नवीनं मार्गमेकं प्रावर्तयत्। प्राचीन-काव्यसमीक्षामार्गाद् भिन्नं मार्गमेकमवलम्बमानोऽसौ वक्रोक्तिं काव्यस्य प्राणभूतं तत्त्वमापादयत्।

आचार्येण कुन्तकेन प्रोक्तम् - साहित्यलेखन स्य द्वौ मार्गो वर्तत। प्रथमो मार्गः शास्त्रीयग्रन्थानां रचनाया अस्ति, यत्र लेखकोः लोकप्र-सिद्धशब्दान् सामान्यव्यवहारार्थेषु प्रयुनक्ति। द्वितीयो मार्गः काव्यप्रणयनस्य वर्तते । अत्र कविः सामान्यव्यवहारार्थेषु प्रयुज्य-मानानां शब्दार्थानां रचनाया भिन्नमार्गमवलम्ब्य काव्येषु वैचित्र्य-मापाद्य सौन्दर्यमादधाति । इदं वैचित्र्यमेव वक्रोक्तिरुच्यते । इयं वक्रोक्तिरेव काव्यस्य प्राणाः यां विना काव्ये न काव्यत्वं प्रवर्तत । वक्रोक्तौ त्रिविधानि मूलतत्त्वान्यत्र प्रतिपादितानि सन्ति । यथा -

क) शास्त्रलोकव्यवहारप्रसिद्धशब्दार्थप्रयोगभिन्नत्वम् ।

ख) प्राक्तनाद्यतनप्रतिभाजन्यचमत्कारजनकत्वम् ।

ग) सहृदयहृदयाह्लादसम्पादनक्षमत्वञ्च ।

अतएव कुन्तकाचार्यः तत्त्वत्रयमिदं समासाद्य स्वकीयं काव्य-लक्षणमेवं प्रस्तौति यत् -

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी ।**
**वन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ॥**[८]

वक्रोक्तेरेतादृशं कल्पनं विदधातुं पूर्ववर्तिनामालङ्कारिकाणां विशेषतः भामहस्य अधमरणत्वं धारयति कुन्तकः । आचार्यभामहः अतिशयोक्त्यलंकारमेव वक्रोक्तिनाम्ना समबोधयत् । अलङ्का-रतन्त्रस्य जीवातुत्वेनापि स्व्यकरोत् । तथाहि -

**सैषा सर्वत्र वक्रोक्तरनयार्थो विभाव्यते ।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥**[९]

भामहोऽतिशयोक्तिं वक्रोक्तिं च पर्यायत्वेन गणयति । अत्र सैषा अतिशोक्तिरेव वक्रोक्तिरित्यर्थः । अनयैव अर्थस्याभिव्यक्तिर्भवति । अतिशयोक्तिमूला एव वक्रोक्तिः । एषा एव वक्रोक्तिः सर्वालङ्का-रमूला ।

कुन्तकाचार्यः वक्रोक्तिजीविते वदति - **वक्रोक्तिः काव्यजीवितम्** ।[१०] वक्रता नाम - विचित्रा, अप्रत्यक्षा, कलात्मकाभिव्यक्तिः। कुन्तकमते एषा षड्विधा -

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ॥**
**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।**
**यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥**
**वक्रभावः प्रकरणे प्रबन्धे वाऽस्ति यादृशः ।**
**उच्यते सहजाहार्य-सौकुमार्य-मनोहरः ॥**[११]

एवमेते षड्भेदाः सन्ति (1) वर्णविन्यासवक्रता (2) पदपुर्वार्धवक्रता (3) पदपरार्धवक्रता (4) वाक्यवक्रता (5) प्रकरणवक्रता (6) वर्णविन्यासवक्रता च। पूर्वोक्तविभाजनेन ज्ञायते यद् वक्रोक्तेर्विस्तारो वर्णादारभ्य प्रबन्धं यावद् वर्तते । एतदन्तर्गतमेव भाषा, प्रकृतिवर्णनम्, चरित्रचित्रणम्, कथासंयोजनम्, ऐतिहासिकतथ्यस-ङ्कलनम्, वस्तुवर्णनम्, अलङ्कारविधानम्, रसप्रयोगः, काव्यसन्दे-शादिकं च तथा सूत्ररूपेणोपलभ्यते येन परवर्तिन्याः साहित्य-समीक्षायाः सरणिः प्रशस्ता भवति । अयं सम्प्रदायः सृजनात्म-कवैचित्र्यं मुख्यतया प्रतिपादयति ।

**५. औचित्यसम्प्रदायः**

काव्ये विभिन्नतत्त्वानामौचित्येन विनियोजनमेव सौन्दर्याधायकं भवतीति काव्यशास्त्रिणामभिमतम् ।

**उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥**[१२]

यद्वस्तु यस्याऽनुरूपमस्ति तदेवाऽऽचार्यैरुचितमुच्यते । उचितस्य च भावः औचित्यमित्युच्यते । औचित्यमिदं न केवलं काव्ये अपि तु लोकेऽपि सर्वत्र व्याप्यं लक्ष्यते ।

औचित्यव्यवहारयुत एव जनो लोके यथा प्रतिष्ठां लभते, अनौचि-त्ययुतव्यवहारेण च हास्यास्पदत्वमनादरमप्रतिष्ठां वाऽऽप्नोति, तथैव स्थितिः काव्येष्वपि संलक्ष्यते । काव्ये रसालङ्कारगुणरीत्यादितत्त्वा-नि तदैव चमत्कारकारीणि रमणीयानि च भवन्ति यदा तेषां विनियोजनमौचित्यपूर्णं भवति । औचित्याभावे कवयो ध्रुवं हास्यास्पदानि निन्दापात्राणि च सञ्जायन्ते । अतः काव्येष्वौचित्यस्य महत्त्वं संलक्ष्य क्षेमेन्द्रेण प्रोक्तम् -

**अलङ्कारास्त्वलङ्काराः गुणा एव गुणा सदा ।**
**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥**[१३]

आचार्यस्य क्षेमचन्द्रस्याभिमतं वर्तते यदौचित्यं काव्यस्य प्रत्यङ्गं भवितव्यम् । काव्य यत्रौचित्यस्याऽभावो भवति, तत्रैव रसभङ्गो भवति । अथ चाऽचारुत्वमरुचिश्चोपजायते । सौन्दर्यमौचित्यमेवा-ऽऽश्रयते । यदि काचित् कामिनी कण्ठे मेखलां, नितम्बयोर्हारं, करयोर्नूपुरे, चरणयोश्च केयूरे परिदधाति, कस्य जनस्य सोपहासास्पदतां, न गमिष्यति ? तथैव यदि कश्चिद् वीरपुरुषो विनम्रशरणागतेषु वीरतां प्रदर्शयति शत्रुषु च करुणां करोति, कस्तं नोपहसिष्यति ? इयमेव स्थितिः काव्येषु वर्तते । अतस्तत्रौ-चित्याभावे न गुणाः नाऽलङ्कारा रमणीयतां रोचकताञ्चाऽ-ऽवहन्ति।[१४] न केवलमलङ्कारेषु गुणेषु चैवंविधा स्थितिरस्ति, रसेष्वपि तथैव स्थितिः । काव्ये रसास्तदैव रमणीयतां भजन्ते, यदा तेषां विन्यास औचित्यपूर्णो भवति ।

अलङ्कारास्तदैवाऽलङ्काराः भवन्ति, यदा तेऽनौचित्येन विच्युताः भवन्ति । सः अपि स्पष्टयति—

**अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।**[१५] अर्थात् अनौचित्यं रसभङ्गस्य मुख्यकारणम्। अतः औचित्यं काव्यस्य संतुलनरक्षकं भवति ।

**६. ध्वनिसम्प्रदायः**

ध्वनिसम्प्रदायः काव्यशास्त्रस्य अत्यन्तं सूक्ष्मः, दार्शनिकः च सम्प्रदायः अस्ति। स्य मूलसिद्धान्तः—काव्यस्य वास्तविकं सौन्दर्यं न केवलं व्यक्ते अर्थे, किन्तु अव्यक्ते, सूचिते, निहिते च अर्थे वर्तते। एषः अव्यक्तार्थः "ध्वनि" इति कथ्यते । आनन्दवर्धनाचार्यमतानुसारं ध्वनिरेव काव्यस्यात्मस्थानीयः, येन काव्यं जीवति। आनन्दवर्धनाचार्यः "काव्यस्यात्मा ध्वनिरिति" समुद्घोष्य काव्यात्मसिंहासने ध्वनिं प्रतिष्ठापयांचक्रे । अत्र प्रश्नः समुदेति कः ध्वनिः? किं वा तस्य स्वरूपम्? कथं वा तस्य आत्मत्वम्?

ध्वन्यालोकस्य प्रथमोद्योते आनन्दवर्धनाचार्यो मङ्गलं विधाय ध्वनिविरोधिमतवादखण्डनपुरस्सरं लिखति

**काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्व-**
**स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमुचुस्तदीयं**
**तेन ब्रूमः सहृदयमनः प्रितये तत्स्वरूपम्॥**[१६] इति

पूर्वकाले ध्वनिरेव काव्यात्मरूपेण प्रतिष्ठितो बभूव । परं केचनाऽऽचार्यास्तस्याऽभिमतस्य खण्डनं कुर्वन्ति तस्याऽऽत्मभावश्च निराकुर्वन्ति। अतो ध्वनेरेव काव्यस्याऽऽत्मभावात् तत्प्रतिपादयितुम् आनन्दवर्धनेन व्याख्यातम् -

काव्ये मुख्यतो द्वावर्थौ भवतः - वाच्यः प्रतीयमानश्च। द्वयोरनयोरर्थयोः प्रतीयमानार्थे प्रधाने सति, तस्य सौन्दर्ये चमत्कारिरूपेणाऽभिव्यज्यमाने सति काव्यं ध्वनिकाव्यमित्यभिधीयते।

आनन्दवर्धनो ध्वनिकाराभिधानेनाऽपि प्रसिद्धः। काव्यसमीक्षाक्षेत्रे तत्पूर्व रसालङ्काररीति- सिद्धान्तत्रयस्य प्रादुर्भावोऽभवत्। विविधैराचार्यैः काव्ये तत्त्वेष्वेतेषु किञ्चिदेकं तत्त्वं काव्यस्याऽऽत्मत्वेन प्रतिपादितम् । परन्त्वानन्दवर्धनेन सामर्थ्यशालिनीभिर्युक्तिभिः साधितं, यदेतानि सर्वाणि तत्त्वान्यङ्गभूतान्येव सन्ति । केवलं ध्वनिरेव सर्वव्यापकत्वात् काव्यस्याऽऽत्मपदे प्रतिष्ठापयितुं शक्यः योग्यश्च।

**उपसंहारः**

एते षट्सम्प्रदायाः संस्कृतकाव्यशास्त्रस्य षट् दृष्टिकोणाः इव सन्ति।

- अलङ्कारः → शोभा
- रसः → आनन्दः
- ध्वनिः → गूढार्थः
- रीतिः → शैली
- वक्रोक्तिः → वैचित्र्यम्
- औचित्यम् → सम्यक्-संतुलनम्

सम्यग्दृष्ट्या पश्यामः चेत् एते सर्वे परस्परं पूरकाः, न तु विरोधिनः। अतः, एतेषां समन्वयेन एव उत्कृष्टं काव्यं सम्भवति।

**पादटिप्पण्यः**

१. नाट्यशास्त्रम्, ६.३१।
२. अभिनवभारती, अध्याय ६. रससूत्रव्याख्या।
३. साहित्यदर्पणः, १ परिच्छेदः।
४. श्लोकवार्तिकम्, वाक्याधिकारः
५. काव्यालङ्कारः -५-६६
६. काव्यादर्शः - २.१
७. काव्यालङ्कारसूत्रवृत्तिः - २.७-८
८. वक्रोक्तिजीवितम् - १.७
९. काव्यादर्शः - २.८५
१०. वक्रोक्तिजीवितम् - १.१
११. वक्रोक्तिजीवितम् - १.१९-२१
१२. औचित्यविचारचर्चा - ७
१३. औचित्यविचारचर्चा - ५.३
१४. औचित्यविचारचर्चा.६.व्याख्या
१५. औचित्यविचारचर्चा
१६. ध्वन्यालोकः - १.१

**उपयुक्तग्रन्थसूची**


- भामहः — काव्यालङ्कारः- Chaukhamba Sanskrit Series, Varanasi - 1993
- दण्डी — काव्यादर्शः - Motilal Banarsidass, Varanasi - 2007
- भरतमुनिः — नाट्यशास्त्रम् - Gaekwad's Oriental Series (GOS), Baroda - 1926
- आनन्दवर्धनः — ध्वन्यालोकः - Chowkhamba Sanskrit Series - 1995
- अभिनवगुप्तः — लोचनम्, अभिनवभारती - Chowkhamba Vidyabhavan - 1987
- वामनः — काव्यालङ्कारसूत्रवृत्तिः - Chowkhamba Sanskrit Series - 2000
- कुन्तकः — वक्रोक्तिजीवितम् - Motilal Banarsidass, Varanasi - 1998
- क्षेमेन्द्रः — औचित्यविचारचर्चा - Chowkhamba Sanskrit Series - 1970
- विश्वनाथः — साहित्यदर्पणः - Chaukhamba Sanskrit Series, Varanasi - 2003